श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ अय्या कुमारतातदेशिकमङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ अय्या कुमारतातदेशिकमङ्गळम् ॥

सुदर्शनकृपालब्ध वेदतत्वार्थसागरम्।
अनुष्ठितक्रतुशतं वन्देऽस्मत्पितरं गुरुम्॥ १ ॥

श्रीशैलनाथ पादाब्ज षट्पदायित चेतसे।
श्रेयसे जगतामस्तु तातयार्याय मङ्गळम्॥ २ ॥

पित्रे ब्रह्मोपदेष्ट्रे मे गुरवे दैवताय च।
प्राप्याय प्रापकायास्तु तातयार्याय मङ्गळम्॥ ३ ॥

श्री वैष्णव तपस्सम्पत्सम्पन्नफलरूपिणे।
हरेरन्यावताराय तातयार्याय मङ्गळम्॥ ४ ॥

मायिसिद्धान्त गाढान्ध ध्वान्तबाल विवस्वते।
श्रुतिमार्ग प्रतिष्ठैक निरतायास्तु मङ्गळम्॥ ५ ॥

गोसवद्वादशाहादि सवनैरवनैस्सताम्।
नित्यसन्तुष्टकमलानिलयायास्तु मङ्गळम्॥ ६ ॥

श्री शैलपूर्णसन्तानकलशाब्धि सुधांशवे।
त्रिलोकी भागधेयाय तातयार्याय मङ्गळम्॥ ७ ॥

यतीन्द्रदृष्टसन्मार्ग प्रतिष्ठापन कारणात्।
भूयोऽपि भुवि रोहिण्यामवतीर्णाय मङ्गळम्॥ ८ ॥

जगत्ख्यातप्रतिष्ठाय निरवद्यस्वनिष्ठया।
कनिष्ठितवसिष्ठाय गुरुश्रेष्ठाय मङ्गळम्॥ ९ ॥

सुदर्शनावतारो वा निगमान्तगुरुः किमु।
यतीन्द्रो वेति तर्क्याय तातयार्याय मङ्गळम्॥ १० ॥

www.prapatti.com

गम्भीरशरणव्रज्यारीतिरस्मादृशामपि।
येन घण्टापथस्तस्मै तातयार्याय मङ्गळम्॥ ११॥

आत्मीयचरणाम्भोजशरणागतदेहिनाम्।
रक्षणे कृतदीक्षाय तातयार्याय मङ्गळम्॥ १२॥

चोलेशमकुटीरत्नरश्मिनीराजिताङ्घ्रये।
कमलानटनावास कटाक्षायास्तु मङ्गळम्॥ १३॥

मङ्गळाशासनमिदं रचितं तस्य सूनुना।
वेङ्कटार्याभिधानेन पठतामस्तु मङ्गळम्॥ १४॥

साग्निचित्य पौण्डरीकसर्वपृष्ठविश्वजिद्-
द्वादशाहवाजपेयसर्वतोमुखादिभिः।
प्रीणयन्तमम्बुजाक्षमर्चयन्तमुक्तिभिः
तातयार्यमस्मदीय तातपादमाश्रये॥ १५॥

॥ इति अय्या कुमारतातदेशिकमङ्गळं सम्पूर्णम्॥

www.prapatti.com